# संस्कृतवार्ताः

दिनाङ्कः-२०१२.०२.०२

सायम्-०६.१०

प्रवाचिका - निधि-शर्मा

अनुवादिके/आलेखपरिष्कारिके -सुषमाकुमारी, निधिशर्मा च

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचिका- निधि-शर्मा

# मुख्यवार्ताः

- नवदेहल्यां केन्द्रीयान्वीक्षण-विभागीय-विशिष्ट-न्यायालयेन जनता-दलस्य अध्यक्षः सुब्रह्मण्यं-स्वामिनः याचिका निरस्तीकृता ।

- कश्मीर-उपत्यकायां पुलवामा-जनपदेऽद्य रक्षिबलेन लश्कर-ए-तैय्यबा इत्यातङ्कवादि-संघटनस्य आतङ्कवादिनौ निष्कासितम् ।

- सर्वकारः नक्सल-प्रभावितेषु-षष्टिः जनपदेषु जनजातीयानां वृत्तिता-स्तरं सन्धारयितुं षड्-नूतनाः परियोजनाः आरप्स्यते ।

अपि च,

  - सीरिया-देशे मानवाधिकाराणां-सीरियन्-विपक्षि-प्रेक्षकैः संसूचितं यद् सीरियन्-रक्षिबलैः गुलिका-प्रहारैः द्वयधिक-शत-जनाः हताः ।

.......................................................

## पी.चिदम्बरम्

नवदेहल्यां केन्द्रीयान्वीक्षण-विभागीय-विशिष्ट-न्यायालयेन जनता-दलस्य अध्यक्षः सुब्रह्मण्य-स्वामिनः याचिका निरस्तीकृता । याचिकायामस्यां तेन द्वि-जी-स्पैक्ट्रं-प्रकरणे गृहमन्त्रि-पी.-चिदम्बरस्य कथित-भूमिकामालक्ष्य तस्योपरि अभियोग-प्रवर्तनार्थं निवेदितमासीत् । केन्द्रीयान्वीक्षणविभागस्य विशिष्ट न्यायाधीश-ओ.पी.सैनी-वर्येण अद्य प्रातः न्यायालये मात्र सुब्रह्मण्य-स्वामिनं प्रवेशमनुतम्, अनन्तरञ्च रहसि तं निर्णयस्य श्रावणावधौ तत्रैवोपस्थातुम् आदिष्टम् ।

## जम्मू-कश्मीर

कश्मीरोपत्यकायां पुलवामा-जनपदेऽद्य आतङ्कवादिनौ मध्ये एकं-भीषण-मुधा-संघर्षं सञ्जातम् । आधिकारिसूत्रैः संसूचितं यद् संघर्षमिदं आतङ्कवादिभिः क्षेत्रस्य अवरोद्धनकारणात् विहितम् । मुधासंघर्षेऽस्मिन् आतङ्कवादिभिः स्वचालितायुधानां प्रयोगमपि कृतम् ।

## माओवादिनः

सर्वकारः नक्सलप्रभावितेषु षष्टिः जनपदेषु जनजातीयानां-वृत्तिता-स्तरं सन्धारयितुं षड्-नूतनाः परियोजनाः आरप्स्यते । परियोजनायाः अस्याः उद्देश्यमस्ति काष्ठं विहाय अन्य-वन्योत्पादानां वृत्तिता आदिवासिनां जीवनस्तर-सन्धारणम् । विषयेऽस्मिन् अलक्त-वेणु-निर्यास-पर्वतीय-वनौषधीनां च उत्पादनं संवर्धयितुं विचार्यते । ग्रामीण-विकास-मन्त्रि जयराम-रमेशः ह्यो नवदिल्ल्यामवोचत् यद् परियोजनायाः विवरणं शीघ्रमेव सज्जीकरिष्यते ।

## सीरिया

सीरिया-देशे मानवाधिकाराणां सीरियन-विपक्षि-प्रेक्षकैः संसूचितं यद् सीरियन-रक्षिबलैः गुलिकाप्रहारैः द्वयधिक-शत-जनाः हताः । लन्दनस्थ कार्यकारि-दल-प्रमुखः-रेमी-अब्दुल-रहमानेनोक्तं यद् 'खालिदिया' जनपदे सप्ताधिक-द्वि-शत-जनाः हताः ।

## सहारा

भारतीय-क्रिकेटस्य प्रमुख-प्रायोजकः सहारा-भारतेन , भारतीय-क्रिकेट्-मण्डलात् स्वकीयाः एकादशवर्षीयाः पुरातनाः वित्तीय-सम्बन्धाः समाप्ताः । सहारा-भारतीयस्य आई.पी.एल्. शृङ्खलातः अपि निष्कासनं जातम् । पञ्चमी-आई.पी.एल्. प्रतियोगितायै क्रीडकानां सघोष-विक्रयः प्रारब्धः । अनेन विक्रयेण कतिचिद् होरा पूर्वमेव सहारा-भारतीयेन पुणे-वारियर्स् इति दलस्य स्वामित्वम् अपि निराकृतम् । अनया घटनया निष्प्रभाविभिः आई.पी. एल्. अधिकारिभिः सघोष-विक्रयः प्रवर्तितः । अधिकारिभिः निगदितं यद् सहारा-भारतेन आई.पी.एल्.-शृङ्खलातः नाम-निराकरण-सम्बद्धा काऽपि सूचना पूर्वं न प्रदत्ता । भारतीय-क्रिकेट्-नियन्त्रण-मण्डलात् सम्बन्ध-विच्छेदनस्य सहारा-भारतीयस्य-निर्णयोऽयम् आश्चर्यजनको वर्तते, सहारा-भारतीयेन सन्दर्भेऽस्मिन् अनेकानि कारणानि अपि प्रदत्तानि । सहारा-भारतीय-गुल्मेन मण्डलमारोपितं यद् मण्डलेन तेषां परिदेवनानामुपरि ध्यानं नैव प्रदत्तम् ।

## राष्ट्रपतिः शुभाशयाः

राष्ट्रपतिना-उप-राष्ट्रपतिना चाशेषं देशं ईद्-ए-मिलाद्-उन्-नबी पर्वणि शुभाशयाः प्रदत्ताः।
स्व-शुभाशये राष्ट्रपति-प्रतिभा-देवी-सिंह-पाटिल-महाभागया आशा प्रकाशिता यत् देवदूत-मोहम्मदस्य जन्मदिवसोऽयं मानवीय-एकतायाः सन्देशं प्रददाति।
उपराष्ट्रपतिना मोहम्मद-हामिद-अन्सारि-वर्येण स्व-सन्देशे प्रोक्तं यद्स्मान् स्नेह-सहिष्णुता-शान्त्याः मार्गः अनुसरणीयः।

।। इति वार्ताः ।।